M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

Ser. 1156

Title: Shiva Kavacha

1156

Complete

C Shiv Kavach		Title
		Author
		Editor
S/c		Year, Vols.
		Publisher
1156		Remarks

श्रीगणेशायनमः॥ ऋषभउवाच॥ नमस्कृत्यमहादेवंसर्वव्यापिनमीश्वरं॥ वक्ष्येशिवमयं
वर्मसर्वरक्षाकरंनृणां॥१॥ शुचौदेशेसमासीनोयथावत्कल्पितासनः॥ जितेंद्रियोजितप्रा
णश्चिंतयेच्छिवमव्ययं॥२॥ हृत्पुंडरीकांतरसंनिविष्टंस्वतेजसाव्याप्तनभोवकाशं॥
अतींद्रियंसूक्ष्ममनंतमाद्यंध्यायेत्परानंदमयंमहेशं॥३॥ ध्यानावधूताखिलकर्म
बंधश्चिरंचिदानंदनिमग्नचेताः॥ षडक्षरंन्याससमाहितात्माशैवेनकुर्यात्कवचेन
रक्षां॥४॥ मांपातुदेवोखिलदेवतात्मासंसारकूपपतितंगभीरे॥ तन्नामदिव्यंवरमंत्रमू
लंधुनोतुमेसर्वमघंहृदिस्थं॥५॥ सर्वत्रमांरक्षतुविश्वमूर्तिर्ज्योतिर्मयानंदघनश्चिदात्मा॥
अणोरणीयानुरुशक्तिरेकःसईश्वरःपातुभयादशेषात्॥६॥ योभूस्वरूपेणबिभर्तिविश्वं
पायात्सभूमेर्गिरिशोष्टमूर्तिः॥ योपांस्वरूपेणनृणांकरोतिसंजीवनंसोवतुमांजलेभ्यः॥७
कल्पावसानेभुवनानिदग्ध्वासर्वाणियोनृत्यतिभूरिलीलः॥ सकालरुद्रोवतुमांदवा
ग्नेर्वात्यादिभीतेरखिलाच्चतापात्॥८॥ प्रदीप्तविद्युत्कनकावभासोविद्यावराभीति
कुठारपाणिः॥ चतुर्मुखस्तत्पुरुषस्त्रिनेत्रःप्राच्यांदिशिस्थोरक्षतुमामजस्रं॥९॥

कुठारवेदांकुशपाशशूल। कपालरुद्राक्षगुणान्दधानः॥ चतुर्मुखो नीलरुचिस्त्रिनेत्रः
पायादघोरो दिशि दक्षिणस्यां॥१०॥ कुंदेंदुशंखस्फटिकावभासो वेदाक्षमालावर
दाभयांकः॥ त्र्यक्षश्चतुर्वक्त्र उरुप्रभावः सद्योधिजातोवतु मां प्रतीच्यां॥११॥ वराक्ष
टं मालाभयटंकहस्तः सरोजकिंजल्कसमानवर्णः॥ त्रिलोचनश्चारुचतुर्मुखो मां पा
यादुदीच्यां दिशि वामदेवः॥१२॥ वेदाभयेष्टांकुशटंकपाशकपालढक्काक्षकशूल
लि पाणिः॥ शितद्युतिः पंचमुखोवतान्मामीशान ऊर्ध्वं परमप्रकाशः॥१३॥ मूर्धानमव्या
न्मम चंद्रमौलिर्भालं ममाव्यादथ भालनेत्रः॥ नेत्रे ममाव्याद्भगनेत्रहारी नासां सदा
रक्षतु विश्वनाथः॥१४॥ पायाच्छ्रुती मे श्रुतिगीतकीर्तिः कपोलमव्यात्सततं कपाली
वक्त्रं सदा रक्षतु पंचवक्त्रो जिह्वां हरो रक्षतु वेदजिह्वः॥१५॥ कंठं गिरीशोवतु नीलकं
ठः पाणिद्वयं पातु पिनाकपाणिः॥ दोर्मूलमव्यान्मम धर्मबाहुर्वक्षस्थलं दक्षमखां
२ व्यो तकोव्यात्॥१६॥ ममोदरं पातु गिरींद्रधन्वा मध्यं ममाव्यान्मदनांतकारी॥ हेरंबत
तातो मम पातु नाभिं पायात्कटिं धूर्जटिरीश्वरो मे॥१७॥ उरुद्वयं पातु कुबेरमित्रो

त्रैयौ

जंघायुगं पुंगवकेतुरव्यात्॥ जानुद्वयं मे जगदीश्वरोव्यात् व्यात्पादौ ममाव्यात्सुरवंद्यपादः॥१८॥ महेश्वरः
पातु दिनादियामे मां मध्ययामेवतु वामदेवः॥ त्र्यंबकः पातु तृतीययामे वृषध्वजः पातु दिनांत्यया
मे॥१९॥ पायान्निशादौ शशिशेखरो मां गंगाधरो रक्षतु मां निशीथे॥ गौरीपतिः पातु निशावसाने मृत्युं
जयो रक्षतु सार्वकालं॥२०॥ अंतःस्थितं रक्षतु शंकरो मां स्थाणुः सदा पातु स्थितं मां॥ तदंतरे पातु पतिः ब हिः
पशूनां सदाशिवो रक्षतु मां समंतात्॥२१॥ तिष्ठंतमव्याद्भुवनैकनाथः पायाद्व्रजंतं प्रमथाधिनाथः॥ वेदां ४
तवेद्योवतु मां निषण्णं मामव्ययः पातु शिवः शयानं॥ मार्गेषु मां रक्षतु नीलकंठः शैलादिदुर्गेषु पुरत्रयारिः॥
२२॥ अरण्यवासादिमहाप्रवासे पायान्मृगव्याध उदारशक्तिः॥ कल्पांतकालोग्रपटुप्रकोपस्फुटाट्टहासोच्च टो
लितांडकोशः॥ घोरारिसेनार्णवदुर्निवारमहाभयाद्रक्षतु वीरभद्रः॥२४॥ पत्त्यश्वमातंगघटावरूथसहस्र घ ६
लक्षायुतकोटिभीषणं॥ अक्षौहिणीनां शतमाततायिनां छिंद्यान्मृडो घोरकुठारधारया॥२५॥ निहंतु दस्यू
प्रलयानलार्चिर्ज्वलत्त्रिशूलं त्रिपुरांतकस्य॥ शार्दूलसिंहर्क्षवृकादिहिंस्रान्संत्रासयत्वीशधनुः पिनाकः॥
२६॥ दुःस्वप्नदुःशकुनदुर्गतिदौर्मनस्यदुर्भिक्षदुर्व्यसनदुःसहदुर्यशांसि॥ उत्पातशापविषभी
तिसमग्रहार्तिव्याधींश्च नाशयतु मे जगतामधीशः॥२७॥ ॐ नमो भगवते सदाशिवाय सकलतत्त्वात्म
काय सकलतत्त्वविहाराय सकललोकैककर्त्रे सकललोकैकभर्त्रे सकललोकैकगुरवे सक

ळलोकैकसाक्षिणेसकळनिगमगुह्यायसकळवरप्रदायसकळदुरितार्त्तिभंजनायसकळजगदभयं
करायसकळलोकैकशंकरायशशांकशेखरायशाश्वतनिजावासायनिष्कळंकायनिर्द्वंद्वायनिःसं
गायनिर्गुणायनिरूपायनिराभासायनिरामयायनिःप्रपंचायनिर्मलायनिर्गमायनिरूपमविभवाय
निराधारायनित्यशुद्धपरिपूर्णसच्चिदानंदायपरमशांतप्रकाशतेजोरूपायजयजयमहारुद्रमहारौ
द्रभद्रावतारमहाभैरवकल्पांतभैरवकपालमालाधरखट्वांगखड्गचर्मपाशांकुशडमरुशूलचा
पबाणगदाशक्तिभिंडिमालतोमरमुसलमुद्गरपाशपरशुपरिघभुशुंडिशतघ्नीचक्रायुधभीषणकरसह
स्रमुखदंष्ट्राकरालविकटाट्टहासविस्फारितब्रह्मांडमंडलनागेंद्रकुंडलनागेंद्रहारनागेंद्रचर्मधरमृ
त्युंजयत्र्यंबकत्रिपुरांतकविरूपाक्षविश्वेश्वरविश्वरूपवृषभवाहनविषभूषणविश्वतोमुखसर्वतो
रक्षरक्षमांमहामृत्युभयंनाशयनाशयरोगभयमुत्सादयोत्सादयविषसर्पभयंशमयशमयचोरभ
यंमारयमारयममशत्रूनुच्चाटयोच्चाटयशूलेनविदारयविदारयकुठारेणभिंधिभिंधिखड्गेनछिंधि णं
छिंधिखट्वांगेनविपोथयविपोथयमुसलेननिष्पेषयनिष्पेषयबाणैःसंताडयसंताडयरक्षांसि
भीषयभीषयभूतानिविद्रावयविद्रावयकूष्मांडवेतालमारीगणब्रह्मराक्षसान्संत्रासयसंत्रासयमा २
२ मभयंकुरुकुरुवित्रस्तंमाश्वासयाश्वासयनरकमहाभयान्मामुद्धरोद्धरसंजीवयसं
श्री जीवयक्षुत्तृड्भ्यांमामाप्याययाप्याययदुःखातुरंमानंदयानंदयशिवकवचेनमामाच्छादयाच्छादय।
त्र्यंबकनमस्तेनमस्ते॥ऋषभउवाच॥१॥ ॥श्री॥ इत्येतत्कवचंशैवंसदैवैरपिदुर्लभं॥
य वरदंव्याहृतंमया॥४४